


संस्कृतकविसम्मेलने उपस्थिताः मञ्चस्थाः कवयः

## संस्कृतकविसम्मेलनम्

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम् तथा गुजरात- साहित्य- अकादमी- गान्धीनगरम् इत्यनयोः संयुक्तोपक्रमेण स्वस्तिश्रीविक्रमाब्द २०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे सायं संस्कृतकविसम्मेलनं समायोजितमासीत् । सन्दर्भेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयश्च स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादं च कारितवन्तः । तत्र निमन्त्रिताः कवयः इत्थम् आसन् - प्रो.रामकरणशर्म, प्रो.कमलेशदत्तत्रिपाठी, प्रो.अम्बालालप्रजापति, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. मिथिलाप्रसादत्रिपाठी, प्रो.रामलखनपाण्डेयः, प्रो. हर्षदेवमाधवः, डॉ. जयप्रकाशनारायणद्विवेदी, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. शिवजीउपाध्यायः, डॉ. अमृतलालभोगायता, डॉ. उमाकान्तचतुर्वेदी, प्रो.रामकुमारशर्म, डॉ. उमारमणझा, प्रो.रमेशकुमारपाण्डेयः, डॉ. शङ्करजीझा, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो.उमाशङ्करशर्म, डॉ. बलदेवानन्दसागरः, श्री भाग्येशझा, प्रो.राजेन्द्रनाणावटी, प्रो.रामसुमेरयादवः च । अस्य कार्यक्रमस्य सञ्चालनं डॉ. नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः ।

## सांस्कृतिककार्यक्रमः

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठयाः अङ्गतयैव विशेषाकर्षणरूपेण सांस्कृतिककार्यक्रमः विश्वविद्यालयेन ८-२-२०१६ तमे दिनाङ्के समायोजितः आसीत् । कार्यक्रमेऽस्मिन् भावाश्रितानि रसाश्रितानि नृत्यानि विशेषप्रयोगपूर्वकाणि नाटकानि च अभवन् । पुनश्च गुर्जरसंस्कृतमिश्रभावाश्रितं यत्सञ्चालनं अध्यापकाः अकुर्वन् तत्तु सर्वाधिकाद्भुतमेव । मान्याः कुलपतिवर्याः अस्य कार्यक्रमस्य सफलतायै ये अध्यापकाः ये च छात्राः प्रयत्नं कृतवन्तः तान् पुरस्कारादिभिः आशीर्वचोभिश्च सम्मानितवन्तः । कार्यक्रमस्यास्य संयोजनं कृतवन्तः डॉ. दीपेशकतिरा, डॉ. ललितपटेलः, डॉ. अमृतलालभोगायता च ।





सांस्कृतिककार्यक्रमाः



सांस्कृतिककार्यक्रमेषु भागम् ऊढवतां चित्रम्

## समायोजिता 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति अखिलभारतीया त्रिदिवसीया दर्शनसङ्गोष्ठी



दर्शनसङ्गोष्ठ्यां प्रो. श्रीकिशोरमिश्रमहाभागाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन एकादशपदवीदानसमारम्भेण समम् एका त्रिदिवसीया अखिलभारतीया दर्शनसङ्गोष्ठी समायोजिता आसीत्। इयं सङ्गोष्ठी ०५.०२.२०१९ दिनाङ्के अस्य विश्वविद्यालयस्य कुलाधिपतिवर्याणां गुजरातराज्यस्य राज्यपालमहोदयानां च श्रीमतां ओम्प्रकाशकोहलीहर्याणां किञ्च कुलपतिवर्याणां श्रीमतां प्रो. गोपबन्धुमिश्रवर्याणां उपस्थितौ समारब्धा। ०५.०२.२०१९ दिनाङ्के पूर्वाह्णे राज्यपालमहोदयेन अस्याः सङ्गोष्ठ्याः उद्घाटनं कृतम्। तदनु अपराह्णे २.३० वादने अस्याः प्रथमं विशिष्टं सत्रं प्रावर्तत। अस्यां सङ्गोष्ठ्याम् आहत्य अष्टौ सत्राणि आसन् यत्र विशिष्टव्याख्यानस्य सत्रद्वयं, शोधपत्रवाचनस्य सत्रषट्कं चासीत्। प्रत्येकमपि सत्रे अध्यक्षः, सञ्चालकः, संवाददाता चेति व्यवस्था कल्पिता आसीत्। संवाददात्रा प्रत्येकमपि सत्रे प्रतिपादितानां विषयाणां सङ्क्षेपेण वृत्तकथनमकारि। अस्यां सङ्गोष्ठ्यां प्रायः पञ्चाशदधिकाः विपश्चिदपश्चिमाः विद्वांसः भागमगृह्णन्। 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति विषयं केन्द्रीकृत्य प्रवृत्तायाम् अस्यां सङ्गोष्ठ्यां पटनाविश्वविद्यालये संस्कृतविभागाध्यक्षचराः प्रो. उमाशङ्करशर्माणः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. राजारामशुक्लः, काशीहिन्दूविश्वविद्यालयस्य कलासङ्कायाध्यक्षः प्रो. श्रीकिशोरमिश्रः, उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः प्रो. गोपालकृष्णदाशः, गुजरात-विश्वविद्यालयस्य भाषाभवनाध्यक्षचरः प्रो. वसन्तकुमारभट्टः, काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्म-विज्ञानसङ्कायाध्यक्षचरः प्रो. कृष्णकान्तशर्मा इतरे च विद्वांसः उपस्थाय दर्शनशास्त्रेषु निहितानां गूढतत्त्वानां सूक्ष्मेक्षिकया विश्लेषणं विधाय स्वविषयान् सरलतया प्रतिपादितवन्तः। सङ्गोष्ठ्याः अङ्गतया ०५.०२.२०१९ दिनाङ्के सायं सांस्कृतिककार्यक्रमस्य आयोजनम् अभूत् यत्र नृत्य-गीत-नाटकादिकार्यक्रमाः समायोजिताः।



कविसम्मेलनस्य किञ्चन दृश्यम्




वाक्यार्थं प्रस्तुवन्तौ पण्ड्यारिधम-जोषीध्रुविनौ

सङ्गोष्ठ्याः द्वितीये दिने सायं परम्परानुगतशैलीमाश्रित्य शास्त्रार्थविचारः प्रवृत्तः यत्र छात्रैः पूर्वपक्षसिद्धान्तपक्षरीत्या शास्त्रार्थः प्रास्तावि। तत्र प्रथमः शास्त्रार्थविचारः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य दर्शनविभागस्य छात्राभ्यां जोशीध्रुविन-पण्ड्यारिधमाभ्यां 'जिज्ञासाधिकरणम्' इति विषयमवलम्ब्य प्रस्तुतः। द्वितीयशास्त्रार्थविचारश्च विश्वविद्यालयसंलग्नस्य सारङ्गपुरस्थस्य बी.ए.पी.एस.स्वामिनारायणसंस्कृतमहाविद्यालयस्य छात्राभ्यां अक्षरसागराभ्यां स्वामिनारायण-सिद्धान्तानुगुणं 'जिज्ञासाधिकरणम्' इति विषयमादाय प्रस्तुतः। ०७.०२.२०१९ दिनाङ्के अस्याः सङ्गोष्ठ्याः अङ्गतया एकं कविसम्मेलनमपि आयोजितं यत्र विविधप्रान्तेभ्यः गुजरातराज्याच्च समागतैः कविवरैः स्वरचितकाव्यपाठः प्रस्तुतः। इत्थम् अस्यां त्रिदिवसात्मिकायाम् अखिलभारतीयदर्शनसङ्गोष्ठ्यां बहुषु विषयेषु आस्तिकनास्तिकव्यावहारिकसामाजिकेत्यादिविषयेषु गभीरतया संवादः जातः। शोधपत्राणां प्रस्तुतिसमये तद्विषयिणी जिज्ञासा, तन्निवारणादिकमपि सुष्ठु सम्पन्नम्।




समापनसमारोहे भाषमाणः प्रो. गोपबन्धुमिश्रवर्यः

अस्याः सङ्गोष्ठ्याः समापनसमारोहः ०७.०२.२०१९ दिनाङ्के अपराह्णे ३.३० वादने समजायत। यत्र सभाध्यक्षरूपेण विश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रमहाभागः, मुख्यातिथिः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सदस्यसचिवचरः प्रो. श्रीकिशोरमिश्रः, सारस्वतातिथिरूपेण उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः आचार्यः गोपालकृष्णदाशः, विश्वविद्यालयस्य कार्यकारिकुलसचिवः डॉ. दशरथजादवः, विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः, कर्मचारिणः अन्तेवासिनश्च समुपातिष्ठन्। अस्य समापनसत्रस्य समग्रं सञ्चालनं डॉ. जानकीशरण आचार्यः अकरोत्। अस्याः दर्शनसङ्गोष्ठ्याः संयोजिकारूपेण डॉ. उमा महेश्वरी कार्यमकरोत्। इत्थम् इयं सङ्गोष्ठी 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति स्वविषये साफल्यं प्राप्नोत्।




दर्शनसङ्गोष्ठ्याः सांस्कृतिककार्यक्रमे नृत्यगीतनाटकादिप्रस्तुवद्भिः छात्रैः सह कुलपतिः इतरे च प्राध्यापकाः



सांस्कृतिककार्यक्रमस्य दृश्यमेकम्